स्तोत्र

क्रं 33

संस्कृत

|| विष्णुपंजरस्तोत्रं ||

६९८। स्तो. ९८६

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

।श्रीरामायनमः॥ ॐविष्णुविष्णुराचम्य वाक्‌वाक्‌घ्राणघ्राणचक्षुचक्षुश्रोत्रश्रो
त्रनाभिहृदयकंठशिरसेनमः॥ शिखयोवाद्धृत्यां यज्ञोपवीतं॥ ॐअपवित्रःपवित्रोवा
सर्वावस्थांगतोपिवा॥ यःस्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरेशुचिः॥ १॥ ॐपुंड
रीकाक्षायनमः॥ ॐअस्यश्रीविष्णुपंजरस्तोत्रमंत्रस्यनारदऋषिरनुष्टुप्छंदः
श्रीविष्णुःपरमात्मादेवता॥ अं बीजं सोहं शक्तिः॥ ॐह्रींकीलकं॥ ममसर्वर
क्ष्यार्थेजपेविनियोगः॥ नारदऋषयेनमः॥ शिरसे॥ अनुष्टुप्छंदसेनमोमु पु
खे॥ श्रीविष्णुःपरमात्मादेवतायनमः॥ हृदये॥ अं बीजंगुह्ये॥ सोहंशक्तिः॥ १

Joint project of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

(1A)

पादयो ॐ ह्रां कीलकं पादाग्रे ॐ ह्रां ह्रीं ह्रुं ह्रैं ह्रौं ह्रः ॥ ॐ ह्रां अंगुष्टाभ्यां नमः ॥ ॐ
ह्रीं तर्ज्जनीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं
कनिष्टिकाभ्यां नमः ॥ ॐ ह्रः करतलकरपृष्टाभ्यां नमः ॥ ॐ ह्रां हृदयाय नमः ॥
ॐ ह्रीं सिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वषट् ॥ ॐ ह्रैं कवचाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय
वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥ इति न्यासः ॥ अं बीजं ॥ प्राणायामं त्रयो कृत्वा पूर
क कुंभक रेचक त्राटक संपुटि ॥ करणि स्वासनिःस्वासता ॥ दक्षिण नाडी च
पुटं ॥ वध्ये कुंभ रेचक वाम नाडी च प्राणायामे तु उच्यते ॥ परं परस्य प्रकृतेरना

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

दिमेकंविशिष्टंवहुधागुहायां॥ सर्वालयंसर्वचराचरस्थंनमामिविष्णुंसरणं
प्रपद्ये॥ नमामिविष्णुंजगदेकमूलंसर्वात्मकंकारणकारणंच॥ नारायणा
ख्यंभगवंतमीश्वरंभजामितंमुक्तिपदैवदायकं॥२॥ इतिध्यानं॥ विष्णुपंजरकं
दिव्यंसर्वदुःखनिवारणं॥ उग्रतेजोमहावीर्यंसर्वशत्रुनिकंदनं॥३॥ त्रिपुरंद
ह्यमानस्यहरस्यब्रह्मणोदितं॥ तदहंसंप्रवक्ष्यामिआत्मरक्षाकरंपरं॥४॥ पा
दौरक्षतुगोविंदजंघेचैवत्रिविक्रमः॥ ऊरूमेकेशवोरक्षेत्कुक्षौरक्षतुवामनः॥५॥
कटिंदामोदरंरक्षेन्नाभौचैवाच्युतंन्यसेत्॥ उदरेपद्मनाभश्चहृदिरिःपृष्टिंचर

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

हतु ॥६॥ वामपार्श्वेस्थितो विष्णुर्दक्षिणे मधुसूदन ॥ बाहुभ्यां बासुदेवश्च हृदये
च जनार्द्दन ॥७॥ केंठे रक्षतु वाराहः कृष्णश्च मुखमंडले ॥ माधवः कर्णमूलेतु
ऋषीकेशश्च नासिके ॥८॥ नेत्रे नारायणो रक्षेल्लाटे गरुडध्वजः ॥ कपोलौ के
शवो रक्षे चक्रपाणिशिरस्तथा ॥९॥ अग्रतः श्रीनृसिंहो मे पृष्ठतो गोपनंदनः
उभयोपार्श्वयोश्चैव सशारौ रामलक्ष्मणौ ॥१०॥ एवं तु पुंडरीकाक्षं आग्नेय्याम
ग्निदेवता ॥ दक्षिणे नरसिंहश्च नैऋत्यां दनुजांतकः ॥११॥ नरोत्तमोपि वारुण्यां
वायव्यां पीतवाससं ॥ गदाधरस्तु कौवेरीशां खईशानतो दिशि ॥१२॥ आका

(3)

शोतु गदा रक्षेत्पातालेषु सुदर्शनः ॥ दिवा रक्षतु मां सूर्यो रात्रौ रक्षतु चंद्रमा ॥
२३ ॥ जले रक्षतु वाराहः स्थले रक्षतु वामनः ॥ अटव्यां नरसिंहश्च सर्वमे पातु के
शवः ॥ २४ ॥ सन्नद्धः सर्वगात्रेषु प्रविष्टो विष्णुपंजरः ॥ विष्णुपंजरप्रविष्टोहं ।
विचरामि महीतले ॥ २५ ॥ राजद्वारे पथे घोरे संग्रामे शत्रुसंकटे ॥ नदीसंत
रणे चैव भयं नास्ति कदाचन ॥ २६ ॥ भूतप्रेतपिशाचादि कूष्मांडा भैरवाद
यः ॥ रक्षरक्ष महादेव नीलग्रीव जटाधर ॥ २७ ॥ रक्षंतु देवताः सर्वे स्मशाने
च महारणे ॥ नश्यंति दर्शनात्तस्य नृहरेर्नामकीर्तनात् ॥ २८ ॥ अपुत्रो लभ ३

(3A)

ज

तेपुत्रंनिधनोधनमाप्नुयात्॥सर्वान् कामान्नवेत्तस्यपठनादेवनसंशयः॥

१९॥विष्णुपंजरनामेदंयःपठेत्सईंनवेत्॥अपथ्योदुर्गमेरक्षेत्सर्वमेवज॰

नार्द्दनः॥२०॥नरोगविघ्नंचतस्यब्रह्महागुरुतल्पगः॥स्त्रीहत्याबालघातीच

सुरापीवृषलीपतिः॥२१॥अपुत्रोलभतेपुत्रंधनार्थीलभतेधनं॥विद्यार्थी

लभतेविद्यांमोक्षार्थीलभतेगतिं॥२२॥आपदाहरतेनित्यंविष्णुस्तोत्रार्थस

र्वदादातारंसर्वसंपत्तिकरोत्यत्रनसंशयः॥२३॥जलेविष्णुस्थलेविष्णु॰

विष्णुःपर्वतमस्तके॥ज्वालमालाकुलेविष्णुसर्वंविष्णुमयंजगत्॥२४॥

Joint project of Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(५)

यस्त्विदंपठेतेनित्यंविष्णुपंजरमुत्तमं॥ मुच्यतेसर्वपापेभ्योविष्णुलोकेस
गच्छति॥ २५ ॥ इतिश्रीब्रह्मांडपुराणेइंद्रनारदसंवादेविष्णुपंजरस्तोत्रंस
माप्तं॥ जानिमृवजिरामनारायणनिपोथिछे॥ ॥ ॥ विस्नुरायजा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com